# Yajnopavita Samikshanam

# યજ્ઞોપવીતસમીક્ષણમ્

## Document Information

Text title : yajnopavItasamIkShaNam

File name : yajnopavItasamIkShaNam.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : June 20, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 20, 2021

*sanskritdocuments.org*

# યજ્ઞોપવીતસમીક્ષણમ્

લેખકઃ - નન્દપ્રદીપકુમારઃ

ઇજ્યતે હવિર્દીયતેઽત્ર યજ્+નઙ્=યજ્ઞઃ । (યજ્ઞ+ઉપ+વીત) યજ્ઞોપવીતમ્ ફલિતમ્ । યજ્ઞાર્થં સંસ્કૃતં સૂત્રવિશેષમ્, યજ્ઞસૂત્રમ્ વા । ઉપવીતમ્ (ઉપ+વિ+ઇણ્ ગતૌ+ક્ત) ઉપ સમીપાર્થકોઽવ્યયપદમ્ । ઉપનયનસંસ્કારેણ પવિત્રીકૃતં વીતં સ્વ-સમીપાગતં બ્રહ્મચારિકૃતે નવતન્તુપરિમિતં વામસ્કન્ધાત્ નાભિપર્યન્તં કટિપર્યન્તં વા લમ્બાયમાનં સૂત્રવિશેષં યજ્ઞોપવીતમિતિ નિરુક્તિઃ । યદ્વા યજ્ઞેન યજ્ઞસ્ય યજ્ઞાય યજ્ઞાદ્વા આગતં યજ્ઞોપવીતમ્ । યજ્ઞોપવીતશબ્દાર્થ ઉક્તઃ સ્મૃતિસારે- યજ્ઞાખ્યઃ પરમાત્મા ય ઉચ્યતે ચૈવ હોતૃભિઃ । ઉપવીતં તતોઽસ્યેદં તસ્માદ્યજ્ઞોપવીતકમ્ ॥

ઇદં યજ્ઞોપવીતમુપનયનેન સમ્ભાવ્યતે,અર્થાત્ ઉપનયનસમયે યજ્ઞોપવીતગ્રહણં ભવતિ । બ્રાહ્મણસ્ય કૃતેઽસ્ય યજ્ઞસૂત્રસ્ય મહતી આવશ્યકતા અસ્તિ । યજ્ઞોપવીતં વિના વિણ્મૂત્રોત્સર્ગં કર્તું નૈવ શક્યતે, ભોજનસ્ય કા કથા તં વિના જલપાનમપિ ન કર્તવ્યમ્ । યતોહિ મુક્તાવલ્યામ્-

વિના યજ્ઞોપવીતેન તોયં યઃ પિબતે દ્વિજઃ ।
ઉપવાસેન ચૈકેન પઞ્ચગવ્યેન શુદ્ધ્યતિ ॥

વિના યજ્ઞોપવીતેન વિણ્મૂત્રોત્સર્ગકૃદ્યદિ ।
ઉપવાસદ્વયં કૃત્વા દાનૈર્હોમૈસ્તુ શુદ્ધ્યતિ ॥

અપિ ચ ગોભિલેન-

સદોપવીતિના ભાવ્યં સદા બદ્ધશિખેન ચ ।
વિશિખ્યોવ્યુપવીતશ્ચ યત્કરોતિ ન તત્કૃતમ્ ॥

ઇતિ । અસ્ય ઉત્પત્તિસ્તુ બ્રહ્મણો જાતા । પદ્માસનસ્થો બ્રહ્મા પદ્મનાલસૂત્રેણાસ્ય નિર્માણં ચકાર । યચ્ચોક્તં સ્મૃતિપ્રકાશે-

યજ્ઞોપવીતં પરમં પવિત્રં વિભૂષણં બ્રાહ્મણલક્ષણં ચ ।
પદ્માસનસ્થેન પિતામહેન ઉત્પાદિતં પંકજનાલસૂત્રાત્ ॥

અસ્ય નિર્માણે ત્રિદેવાનાં બ્રહ્મ-વિષ્ણુ-મહેશ્વરાણાં મહતી અનુકમ્પા વિદ્યતે । સાવિત્રીદેવી અસ્ય જીવન્યાસકર્ત્રી । તથા ચ -

બ્રહ્મણોત્પાદિતં સૂત્રં વિષ્ણુના ત્રિગુણીકૃતમ્ ।
રુદ્રેણ દત્તો ગ્રન્થિર્વૈ સાવિત્ર્યા ચાભિમન્ત્રિતમ્ ॥

સંપ્રતિકે કલૌ યજ્ઞસૂત્રં કાર્પાસયુક્તં પ્રતિભાતિ । તત્પ્રમાણન્તુ-

કૃતે પદ્મમયં સૂત્રં ત્રેતાયાં કનકોદ્ભવમ્ ।
દ્વાપરે રાજસં પ્રોક્તં કલૌ કાર્પાસસમ્ભવમ્ ॥

યજ્ઞોપવીતસ્યોત્પત્તિં જાનાતિ બ્રાહ્મણો ન ચેત્ ।
સ વૈ વહતિ ભારાય પુસ્તકાનિ યથા વૃષઃ ॥

નાભિપર્યન્તં લમ્બાયમાનં યજ્ઞોપવીતં ધાર્યમિતિ વસિષ્ઠઃ । કટિપર્યન્તમિતિ કાત્યાયનઃ । તથા હિ-

નાભેરુર્દ્ધ્વમનાયુષ્યમધો નાભેસ્તપઃક્ષયઃ ।
તસ્માન્નાભિસમં કુર્યાદુપવીતં વિચક્ષણઃ ॥

અપિ ચ કાત્યાયનઃ-

પૃષ્ઠદેશે ચ નાભ્યાં ચ ધૃતં યદ્ વિન્દતે કટિમ્ ।
તદ્ધાર્યમુપવીતં સ્યાન્નાતિલમ્બં ન ચોચ્છ્રિતમ્ ॥

ઇતિ । અસ્ય યજ્ઞસૂત્રસ્ય સ્થલવિશેષે ત્રીણિ નામાનિ પ્રસિદ્ધાનિ સન્તિ । બ્રહ્મસૂત્ર-નિવીત-પ્રાચીનાવીતભેદાત્ । દેવકાર્યે બ્રહ્મસૂત્રં સવ્યે વામસ્કન્ધે ધારણમ્ । માલવત્કંઠાવલમ્બિતં નિવીતં મનુષ્યકાર્યે તર્પણાદૌ પ્રસિદ્ધમ્ । અપસવ્યે દક્ષિણસ્કન્ધે નિવેશિતં પ્રાચીનાવીતં પિતૃકાર્યે પ્રશસ્તમ્ । યદુક્તં હેમાદ્રૌ ભરદ્વાજઃ-

દક્ષિણબાહુમુદ્ધૃત્ય વામસ્કન્ધે નિવેશિતમ્ ।
યજ્ઞોપવીતમિત્યુક્તં દેવકાર્યેષુ શસ્યતે ॥

કંઠાવલમ્બિતં ચૈવ બ્રહ્મસૂત્રં યદા ભવેત્ ।
તન્નિવીતમિતિ ખ્યાતં શસ્તં કર્મણિ માનુષે ॥

ઉત્ક્ષિપ્તે વામબાહૌ ચ દક્ષિણસ્કન્ધમાશ્રિતમ્ ।
પ્રાચિનાવીતમિત્યાહુઃ તત્પિત્રેષ્વેવ કર્મસુ ॥

મનુનાપિ-

ઉદ્ધૃતે દક્ષિણે પાણાવુપવીત્યુચ્યતે દ્વિજઃ ।
સવ્યે પ્રાચીનાવીતી સ્યાન્નિવીતી કંઠસજ્જનમ્ ॥

કદા નવીનં યજ્ઞોપવીતં ધારણીયમિતિ વિષયે શાસ્ત્રાન્તરે બહુધા ઉક્તમ્ । તત્ર ઉપાકર્મારમ્ભે (સંવત્સરાદૌ વેદપાઠકર્મણિ) દાનકર્મણિ, જનનાશૌચે, મરણાશૌચે, શ્રાદ્ધે, ચન્દ્રસૂર્યગ્રહણોપરાન્તે, યજ્ઞાદૌ ચ નવીનીકર્તવ્યમ્ । ઉક્તં શ્રીરામકલ્પદ્રુમે જ્યોતિષાર્ણવે ચ-

ઉપાકર્મણિ ચોત્સર્ગે સૂતકદ્વિતયે તથા ।

શ્રાદ્ધકર્મણિ યજ્ઞાદૌ શશિસૂર્યગ્રહેઽપિ ચ ॥

નવયજ્ઞોપવીતાનિ ધૃત્વા જીર્ણાનિ ચ ત્યજેત્ ॥

કદાચિત્ અસ્પૃશ્ય સ્પર્શેન, અભક્ષભક્ષણેન, સૂત્રછેદનેન ચ નવીનં ધારણીયમ્ ।

એતસ્ય યજ્ઞસૂત્રસ્ય પરમાયુરપિ નિર્દિષ્ટોઽસ્તિ । ધારણદિનાત્ ચતુર્માસાન્તે અવશ્યમેવ નૂતનં સૂત્રં ધારણીયમ્ । યચ્ચોક્તં ગોભિલઃ-

ધારણાત્બ્રહ્મસૂત્રસ્ય ગતે માસચતુષ્ટયે ।
ત્યક્ત્વા તાન્યપિ જીર્ણાનિ નવાન્યનાનિ ધારયેત્ ॥

ન ધારયતિ મૂઢાત્મા સર્વકર્મસુ ગર્હિતઃ ॥

અપિ ચાહ્નિકસૂત્રાવલ્યામ્-

સૂતકે મૃતકે ચૈવ ગતે માસચતુષ્ટયે ।
નવયજ્ઞોપવીતાનિ ધૃત્વા જીર્ણાનિ સંત્યજેત્ ॥

અત્ર મનુઃ-

મન્ત્રેણ ધારણં કાર્યં મન્ત્રેણ ચ વિસર્જનમ્ ।
કર્તવ્યં ચ સદા સદ્ભિર્નાત્ર કાર્યા વિચારણા ॥

પારિજાતેઽપિ-

યજ્ઞોપવીતમન્ત્રેણ ધારયેદ્ બ્રહ્મસૂત્રકમ્ ।
સ્મૃત્યુક્તેન તુ મન્ત્રેણ નિષ્કાશ્યં બ્રહ્મસૂત્રકમ્ ॥

ધારણમન્ત્રસ્તાવત્કૌષતકીશાખાયાં- યજ્ઞોપવીતેનોપવ્યયામિ દીર્ઘાયુત્વાય સુપ્રજાસ્ત્વાય સુબીર્યાય સર્વેષાં વેદાનામાધિપત્યાય યશસે બ્રહ્મવર્ચસાય । સર્વત્ર-

યજ્ઞોપવીતં પરમં પવિત્રં પ્રજાપતેર્યત્સહજં પુરસ્તાત્ ।
આયુષ્યમગ્ર્યં પ્રતિમુઞ્ચ શુભ્રં યજ્ઞોપવીતં બલમસ્તુ તેજઃ ॥

યદ્વા- યજ્ઞોપવીતમસિ યજ્ઞસ્ય ત્વા યજ્ઞોપવીતેનોપનહ્યામિ । ત્યાગમન્ત્રઃ-

બ્રહ્માવિષ્ણુમહેશાદ્યાસ્તનૂતાં દેવતાઃ સ્મૃતાઃ ।
ત્યક્ષામિ પુણ્યકાલેઽસ્મિન્ ભવતાં તૃપ્તિહેતવે ॥

અપિ ચ -

એતાવદ્દિનપર્યન્તં બ્રહ્મત્વં ધારિતં મયા ।
જીર્ણત્વાત્વત્પરિત્યાગઃ ગચ્છ સૂત્રં યથાસુખમ્ ॥

જીર્ણયજ્ઞોપવીતં શિરોમાર્ગેણ નિઃસાર્ય જલે નિક્ષિપેત્ ।

કતિ સંખ્યકં યજ્ઞસૂત્રં ધારણીયમિતિ ચેચ્ચતુર્થપરિમિતમુચ્યતે, અધિકારિ-પ્રતિનિધિરૂપેણ । તથા હિ-

યજ્ઞોપવીતે દ્વે ધાર્યે શ્રૌતે સ્માર્તે ચ કર્મણિ ।
તૃતીયમુત્તરીયાર્થં વસ્ત્રાભાવે ચતુર્થકમ્ ॥

અધિકારી ભેદેન ચાત્ર દેવલઃ-

ઉપવીતં વટોરેકં દ્વે તથેતરયોઃ સ્મૃતે ।
એકમેવ યતીનાં સ્યાદિતિ શાસ્ત્રવિનિશ્ચયઃ ॥

વિણ્મૂત્રસમયે દક્ષિણકર્ણે સ્થાપનીયમ્ । અન્યથા અશુદ્ધિર્જાયતે સૂત્રસ્ય । દક્ષિણકર્ણે સર્વેષાં દેવાનાં તીર્થાનાં ચ સમાવેશોઽસ્તિ । યચ્ચોક્તં-

આદિત્યા વસવો રુદ્રા વાયુરગ્નિશ્ચ ધર્મરાટ્ ।
વિપ્રસ્ય દક્ષિણે કર્ણે નિત્યં તિષ્ઠન્તિ દેવતાઃ ॥

અગ્નિરાપશ્ચ વેદાશ્ચ સોમઃ સૂર્યોઽનલસ્તથા ।
સર્વે દેવાસ્તુ વિપ્રસ્ય કર્ણે તિષ્ઠન્તિ દક્ષિણે ॥

પ્રભાસાદીનિ તીર્થાનિ ગંગાદ્યાઃ સરિતસ્તથા ।
વિપ્રસ્ય દક્ષિણે કર્ણે વસન્તિ મુનિરબ્રવીત્ ॥

ગંગા ચ દક્ષિણે શ્રોત્રે નાસિકાયાં હુતાશનઃ ।
ઉભયોઃ સ્પર્શનેનૈવ તત્ક્ષણાદેવ શુદ્ધ્યતિ ॥

ઇતિ ।

અસ્ય નિર્માણપ્રણાલીવિષયેઽપિ શાસ્ત્રં ન મૌનમ્ । અવિતથં તત્ત્વં પ્રકાશયતિ । ગ્રન્થાન્તરેષુ આહ્નિકસૂત્રાવલ્યાદિષુ-

શુચૌ દેશે શુચિઃ સૂત્રં સંહતાંગુલિમૂલકે ।
આવેષ્ટ્યષણ્ણવત્યાં ચ ત્રિગુણીકૃત્ય યત્નતઃ ॥

અંગુલ્યગ્રે તુ વિપ્રાણાં ક્ષત્રિયો મધ્યપર્વતઃ ।
અંગુલિમૂલે તુ વિશાં કુર્યાત્સૂત્રસ્ય વેષ્ટનમ્ ॥

ષોડશાશીતિ વિપ્રાણાં દ્વાદશાતીતિ ભૂભુજામ્ ।
ચતુરશીતિ વૈશ્યાનામશીતિઃ શૂદ્ર ઉચ્યતે ॥

અલિંગકૈસ્ત્રિભિઃ સમ્યક્ પ્રક્ષાલ્યોર્દ્ધ્વવૃતં ચ યત્ ।
અપ્રદક્ષિણમાવૃત્તઃ સાવિત્ર્યા ત્રિગુણીકૃતમ્ ॥

અધઃ પ્રદક્ષિણાવૃત્તં સમં સ્યાન્નવસૂત્રકમ્ । ત્રિરાવેષ્ટ્ય દૃઢં બદ્ધ્વા હરિબ્રહ્મેશ્વરાન્નમન્ । ત્રિવૃદૂર્ધ્વં વૃતં કાર્યં તન્તુત્રયમધોવૃતમ્ । ત્રિવૃતં ચોપવીતં સ્યાત્તસ્યૈકો ગ્રન્થિરુચ્યતે ॥

વામાવર્તં ત્રિગુણં કૃત્વા પ્રદક્ષિણાવર્તં નવગુણં વિધાય । તદેવં ત્રિસરં કૃત્વા ગ્રન્થિમેકં વિદધ્યાત્ ॥

પૃષ્ઠવંશે ચ નાભ્યાં ચ વૃતં યદ્વિન્દતે કટિમ્ ।
તદ્ધાર્યમુપવીતં સ્યાન્નાતિલમ્બં નો ચોચ્છ્રિતમ્ ॥

વામસ્કન્ધે કૃતં નાભિહૃત્પૃષ્ઠવંશયોર્ધૃતમ્ ।
કટિપર્યન્તમાપ્નોતિ તાવત્પરિમાણં ભવેત્ ॥

નવતન્તુપરિમિતે યજ્ઞસૂત્રે નવ તન્તુદેવતાઃ સન્તિ । તે ચ-
ઓંકારઃ પ્રથમે તન્તૌ દ્વિતીયેઽગ્નિસ્તથૈવ ચ ।
તૃતીયે નાગદૈવત્યં ચતુર્થે સોમદેવતા ॥

પઞ્ચમે પિતૃદૈવત્યં ષષ્ઠે ચૈવ પ્રજાપતિઃ ।
સપ્તમે મારુતશ્ચૈવ અષ્ટમે સૂર્ય એવ ચ ॥

સર્વે દેવાસ્તુ નવમ ઇત્યેતા તન્તુદેવતાઃ ॥

ઇતિ । ઉપર્યુક્તં વિધિવિધાનાદિકં સમયસાપેક્ષં સંપ્રતિ અસમ્ભવં મન્યતે । યથાસાધ્યં યજ્ઞોપવીતં નિર્માય ગંગાજલેન વિધૌત્ય એકસ્મિન્ પાત્રે નિધાય અભિમન્ત્રયેત્ વૈદિકવિધિના । ધારણાન્તે આચમનમ્ । સૂર્યાર્ઘ્યદાનમ્ । અન્તે અષ્ટોત્તરશતસંખ્યકો ગાયત્રીમન્ત્રો જાપ્યઃ ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

*Yajnopavita Samikshanam*
pdf was typeset on June 20, 2021

Please send corrections to *sanskrit@cheerful.com*